# Contents


1 nIlotpalAmbA jayati 2

2 nIlotpalAmbAM 3

3 nIlotpalAmbikayA 4

4 nIlotpalAmbikAyai 5

5 nIlotpalAmbikAyAH paraM 6

6 nIlotpalAmbikAyAH tava 7

7 nIlotpalAmbikAyAM 8

8 nIlotpalAmbikE 9

9 shrI nIlotpalanAyikE 10

# नीलोत्पलाम्बा गौळान्त कीर्तनानि

## 1 nIlotpalAmbA jayati

## १. नीलोत्पलाम्बा जयति

### रागम्ः नारायणगौळ (२९) तालम्ः मिश्र चापु

श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

नीलोत्पलाम्बा जयति नित्यशुद्धशुभदायिका श्री

**अनुपल्लवि**

मूलाज्ञानहरगुरुगुहजननी

**मध्यमकाल साहित्यम्**

फाललोचनी पुराणी पन्नगवेणी नतवाणी

**चरणम्**

शिवकामेश्वरी शङ्करी शृङ्गाररसकरी
पाशाङ्कुशधरी परमदयाकरी

**मध्यमकाल साहित्यम्**

भवरोगहरनिपुणवरदायिन्यां

नारायणगौळरागमोदिन्यां

भुक्तिमुक्तिमच्चित्तं विलयतु

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 2 nIlotpalAmbAM

# २. नीलोत्पलाम्बाम्

## रागम्ः नारीरीतिगौळ (२०)     ताळम्ः मिश्र चापु

### श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

नीलोत्पलाम्बां भज रे रे चित्त
वीथिविटङ्कत्यागराजान्तरङ्गां श्री

### अनुपल्लवि

मूलकूटत्रयकलेबरशोभारुणां
मुचुकुन्दादिनुतपङ्कजचरणाम्

### मध्यमकाल साहित्यम्

मूलविद्यादाननिपुणां
विधिपूजितविनोदकिरणाम्

### चरणम्

कमलानगरनिवासिनीं गुरुगुहमार्गरीतिकौळिनीं
कमनीय कामकलाप्रदर्शिनीं कादिहादयादिमनुविश्वासिनीं

### मध्यमकाल साहित्यम्

सामगानशिरःकम्पिनीं अखिलमहादुरितभञ्जनीम्

कोमळकुचकचभराङ्गिणीं मुकुन्दसोदरीं पुराणीम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 3 nIlotpalAmbikayA

# ३. नीलोत्पलाम्बिकया

## रागम्ः कन्नडगौळ (२२) तालम्ः आदि

### श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

नीलोत्पलाम्बिकया निर्वाणसुखप्रदया रक्षितोऽहम्

### अनुपल्लवि

वल्लीशगुरुगुहपूजितया वरलक्ष्मीवाणीसेवितया

### मध्यमकाल साहित्यम्

हल्लीशलास्यसन्तुष्टया आरक्तवर्णशोभितकरया

### चरणम्

काशीकन्नडगौळदेशादिवासदासजनावनतोषितया
वासवादिवन्दितवागीशवासुदेवाद्याराधितया

### मध्यमकाल साहित्यम्

श्रीशिवपुराणप्रतिपादितया शिवशङ्करनायिकया श्री

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 4 nIlotpalAmbikAyai

# ४. नीलोत्पलाम्बिकायै

## रागम्ः केदारगौळ (२८) ताळम्ः आदि

### श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

नीलोत्पलाम्बिकायै नमस्ते जगदम्बिकायै

### अनुपल्लवि

मूलाधारक्षेत्रस्थितायै मुचुकुन्दवरप्रदायै

### मध्यमकाल साहित्यम्

मूलमन्त्रात्मिकायै मूलाज्ञानहरगुरुगुहवरदायै

### चरणम्

कामसञ्जीविन्यै कमलावाणीसेवितायै
कलिकल्मषनाशिन्यै करुणामृतरसप्रवाहिन्यै

### मध्यमकाल साहित्यम्

कामेश्वरमोहितकौळिन्यै कामतन्त्रवितरणनलिन्यै
कमलेशपूजितत्रिकोणायै कामितार्थफलप्रदनिपुणायै

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 5 nIlotpalAmbikAyAH paraM

# ५. नीलोत्पलाम्बिकायाः परम्

## रागम्ः गौळ (१५) तालम्ः रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

नीलोत्पलाम्बिकायाः परं नहि रे रे चित्त

### अनुपल्लवि

सालोकादि मुक्तिदायिन्याः
सुरपतिगुरुगुहसन्नुतचरणायाः

### मध्यमकाल साहित्यम्

नीलरत्नमणिभूषिण्याः निरञ्जन्याः

### चरणम्

स्थूलसूक्ष्मकारणरूपिण्याः
बालचन्द्रसेवितवरदायिन्याः

### मध्यमकाल साहित्यम्

कैलासविलसितकुळकौळमार्गयोगिन्याः

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 6 nIlotpalAmbikAyAH tava

# ६. नीलोत्पलाम्बिकायाः तव

## रागम्ः मायामाळवगौळ (१५)    ताळम्ः मिश्र चापु

### श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

नीलोत्पलाम्बिकायास्तव दासोऽहं श्री

### अनुपल्लवि

नीलाम्बरानुजायाः निरुपमपदाम्बुजायाः

### मध्यमकाल साहित्यम्

नीलकण्ठार्धशरीरिण्याः निखिललोकजनन्याः

### चरणम्

मायामाळवगौळादिदेशप्रकाशिन्याः
मातङ्गवदनेन्द्रादिपूजितवरदायिन्याः

### मध्यमकाल साहित्यम्

मायामयविश्वोत्पत्तिस्थितिलयकारणायाः
माधुर्यामृतधारमहादेवगुरुगुहपाशिन्याः

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

# 7 nIlotpalAmbikAyAM

# ७. नीलोत्पलाम्बिकायाम्

## रागम्: पूर्वगौळ (२९) तालम्: रूपकम्

श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

नीलोत्पलाम्बिकायां भक्तिं करोमि श्री

### अनुपल्लवि

नीलोत्पलनायकसमेतायां

निखिलागमसन्नुतायां
नीलाम्बरपुष्पमालावृतायाम्

### चरणम्

कविजनादिमोदिन्यां कमलेशपालिन्यां

सूर्यकोटिप्रकाशिन्यां सूरिजनोपासित-
पूर्वगौळप्रकाशिन्याम्

### मध्यमकाल साहित्यम्

अविद्याविद्यास्वरूपिण्यां आरक्तवर्णरूपिण्यां
इभवदनगुरुगुहादिजनन्याम्

## 8 nIlotpalAmbikE

# ८. नीलोत्पलाम्बिके

## रागम्: छायागौळ (१५)     ताळम्: रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

नीलोत्पलाम्बिके नित्यशुद्धात्मिके मामव

### अनुपल्लवि

त्रिलोकजननि त्रिभुवनमोहिनि

### मध्यमकाल साहित्यम्

त्रैलोक्यचक्रवासिनि सद्गुरुगुहविश्वासिनि

### चरणम्

मायाप्रपञ्चातीतस्वरूपिणि
मुचुकुन्दभक्तपालिनि वरदायिनि

### मध्यमकाल साहित्यम्

छायागौळरागमोदिनि निरञ्जनि
सायुज्यादिदायिनि सच्चिदानन्दरूपिणि

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 9 shrI nIlotpalanAyikE

# ९. श्रीनीलोत्पलनायिके

## रागम्: नारीरीतिगौळ (२०)     ताळम्: रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

श्रीनीलोत्पलनायिके जगदम्बिके
श्रीनगरनायिके मामव वरदायिके

### अनुपल्लवि

दीनजनार्तिप्रभञ्जनरीतिगौरवे
देशिकप्रदर्शितचिद्रूपिणि नतभैरवे

### मध्यमकाल साहित्यम्

आनन्दात्मानुभवे अद्रिराजसमुद्भवे
सूनशरारिवैभवे ज्ञानसुधार्णवे शिवे

### चरणम्

संकल्पविकल्पात्मकचित्तवृत्तिजाले

साधुजनाराधितसद्गुरुकटाक्षमूले

संकटहरधुरीणतरगुरुगुहानुकूले
सामस्तविश्वोत्पत्तिस्थितिलयादिकाले

## मध्यमकाल साहित्यम्

विटङ्कत्यागराजमोहितविचित्रलीले

शङ्करि कृपालवाले हाटकमयचेले

पङ्कजनयनविशाले पद्मरागमणिमाले
शङ्करसन्नुतबाले शारदे गानलोले

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇